**D 93527** **(Pages : 2)** **Name.....................................**

**Reg. No..................................**

# FIRST SEMESTER P.G. DEGREE EXAMINATION, NOVEMBER 2020

(CCSS)

Sanskrit Language and Literature General

SKT 1C 04—INDIAN PHILOSOPHICAL TRADITIONS : THEORIES AND CONCEPTS

(2019 Admissions)

Time : Three Hours Maximum : 80 Marks

I. (a) Answer in one *or* two sentences :

1 Name the Pramāṇas accepted by Sāṅkhya system.

2 Name the Ratnatraya of Jainism.

3 Name the four different schools of thought in Buddhism.

4 Who is believed to be the propounder of Nyāya system of philosophy ?

5 What is the simile given in Sāṅkhyakarika to show the relation between Prakṛti and Puruṣa ?

6 Why Māya is called Anirvacañiya in Advaita system ?

7 How many types of bodies (śarīras) are accepted ın yoga system ? Which are they ?

8 Name the text written by Utpaladeva on śaiva philosophy.

9 Who wrote the commentary called vimarśini on śivasūtra ?

10 Who is the author of Mīmāṁsānyāya Prakāśa ?

(b) State whether true *or* false :

11 Naiyāyikas accept four Pramāṇas .

12 Advaita Vedānta accepts Samavāya Saṁbandha.

13 Bauddhās believe in reincarnation.

14 Jainism accepts that truth has many aspects.

15 The Buddha discovered the Law of Dependent Origination (Pratītyasamutpāda)

(15 × 1 = 15 marks)

**Turn over**

CHMK LIBRARY UNIVERSITY OF CALICUT

II. Write short note on any *eight* of the following :

16 Hetvābhāsas in Nyāya system.

17 Svataḥ prāmāṇyavāda in Pūrvamīmāṁsa.

18 Vivarttavādaḥ.

19 Bhumikas in yoga.

20 The concept of four phases of Mind.

21 The concept of Pañcakośa.

22 Six means of proof which help Viniyogavidhi.

23 Abhinavagupta.

24 Major concepts of Kaśmir śaivism reflected on Indian Aesthetics.

25 Major texts on Pratyabhijña philosophy.

(8 × 3 = 24 marks)

III. Write short essays on any *five* :

26 Lingam tatparyanirṇaye – What are the six types of lingas ? Elucidate.

27 Basic concept of knowledge in Jainism.

28 Abhinavagupta's contribution to Indian Aesthetics.

29 Means of valid knowledge in Nyāya - vaiśeṣika system.

30 Major concepts of Kaśmir śaivism .

31 Vasugupta and his works.

32 Pariṇāmavāda.

(5 × 5 = 25 marks)

IV. Write essay on any *two* :

33 Compare and contrast sāṅkhya and yoga systems of thought.

34 Evaluate the Advaita vedanta of Śankara.

35 Write an essay on the five types of theory of error (Khyātivāda).

36 Write an essay on Major Pramāṇas in Indian philosophy.

(2 × 8 = 16 marks)

CHMK LIBRARY UNIVERSITY OF CALICUT

**D 93526** (Pages : 2) Name.....................................

Reg. No..................................

## FIRST SEMESTER P.G. DEGREE EXAMINATION, NOVEMBER 2020

(CCSS)

Sanskrit Language and Literature General

SKT 1C 03—INDIAN INTELLECTUAL TRADITIONS I

(THOUGHTS ON LANGUAGE AND DISCOURSE MODELS)

(2019 Admissions)

Time : Three Hours Maximum : 80 Marks

संस्कृतभाषायां देवनागर्याम् उत्तराणि देयानि ।

I. वाक्येन वाक्याभ्यां वा त्रयोदशानाम् उत्तरं लिखत :

1 गौरित्यस्य शब्दस्य के के अपभ्रंशाः भाव्यकारेण प्रदर्शिताः ?

2 सिद्धशब्दस्य कः पदार्थः ?

3 उत्सर्गापवादयोः अपवादः कः ? अपवादस्यैकम् उदाहरणं यथाग्रन्थं प्रदर्शयत ।

4 व्याकरणमहाभाष्यस्य प्रथमाह्निकस्य नाम किम् ?

5 'सर्वे देशान्तरे' इत्यस्य कोऽर्थः ?

6 केषां शब्दानाम् अनुशासनं करोति ?

7 'लक्ष्यलक्षणे व्याकरणम्' इत्यस्य कोऽर्थः ?

8 उपदेश इत्यस्य कोऽर्थः ?

9 यास्कविरचिते निरुक्ते प्रथमं वाक्यं किम् ?

10 चत्वारि पदजातानि कानि ?

11 निरूक्ते कर्मशब्दः कस्मिन्नर्थे प्रयुक्तो दृश्यते ?

12 तन्त्रयुक्तिरिति पदे तन्त्रशब्दस्यार्थं लिखत ।

13 अर्थशास्त्राश्रिताः कति युक्तयः प्रदर्शिताः सन्ति ?

14 तन्त्रयुक्तिषु संशयस्य लक्षणं लिखत ।

15 निर्देशस्य लक्षणं किम् ?

(13 × 1 = 13 marks)

Turn over

CHMK LIBRARY UNIVERSITY OF CALICUT

II. एकादशानां लघुटिप्पणीः लिखत :

16 यस्तु प्रयुङ्क्ते ।

17 सक्तुमिव ।

18 प्रयोगे सर्वलोकस्य ।

19 सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः ।

20 वृत्तिसमवायार्थ उपदेशः ।

21 षड्भावविकाराः के ?

22 उपमार्थानां चतुर्णां निपातानाम् उदाहरणानि लिखत ।

23 कर्मोपसंग्रहनिपातस्य लक्षणं किम् ?

24 अध्वर्युः इति शब्दस्य व्युत्पत्तिं प्रदर्शयत ।

25 उपदेशं सोदाहरणं लक्षयत ।

26 उत्तरपक्षस्य सोदाहरणं लक्षणं लिखत ।

27 "धर्ममर्थं च कामं च प्रवर्तयति पाति च ।
अधर्मानर्थविद्वेषानिदं शास्त्रं निहन्ति च ।।" इति श्लोकस्य अर्थं लिखत ।

28 निदर्शनस्य सोदाहरणं लक्षणं लिखत ।

(11 × 3 = 33 marks)

III. पञ्चानां निरुक्तिं लिखत :

29 आचार्यः ।

30 कुल्माषः ।

31 दक्षिणा ।

32 शाखा ।

33 नरकम् ।

34 शिशिरम् ।

(5 × 2 = 10 marks)

IV. द्वे उपन्यस्यत :

35 निघण्टवः कस्मादिति यथाग्रन्थं स्ववाक्यैः निरूपयत ।

36 उपसर्गविषये शाकटायनमतं गार्ग्यमतं च विस्तरेण प्रदर्शयत ।

37 अर्थशास्त्रस्य सामान्यपरिचयपूर्वकं तत्र प्रयुक्तानां तन्त्रयुक्तीनां प्राधान्यं प्रतिपादयत ।

(2 × 8 = 16 marks)

V. एकमुपन्यस्यत :

38 व्याकरणस्य प्रयोजनानि भाष्यदिशा निरूपयत ।

39 अस्त्यप्रयुक्तः इति भाष्यवचनं विस्तरेण प्रतिपादयत ।

(1 × 8 = 8 marks)

CHMK LIBRARY UNIVERSITY OF CALICUT

**D 93525** (Pages : 3) Name.................................

Reg. No.................................

# FIRST SEMESTER P.G. DEGREE EXAMINATION, NOVEMBER 2020

(CCSS)

Sanskrit Language and Literature General

SKT 1C 02—NATYASASTRA TRADITIONS

(2019 Admissions)

Time : Three Hours | Maximum : 80 Marks

संस्कृतभाषया आङ्गलभाषया वा उत्तराणि देयानि ।
संस्कृतलेखने देवनागरीलिपिरूपयोक्तव्या ।

I. वाक्येनैकेन द्वाभ्यां वा उत्तरं लिखत :

1 नाट्यशास्त्रे कति अध्यायाः सन्ति । केन भारतीयदर्शनेन एषा संख्या संबद्धा ?

2 अभिनवगुप्तविरचितानां त्रयाणां स्वतन्त्रग्रन्थानां नामानि लिखत ।

3 अभिनवगुप्तानुसारेण सङ्ग्रहशब्दस्य व्युत्पत्तिं लिखत ।

4 चिरन्तनानां च अयमेव पक्षः । कोऽयं पक्षः ?

5 भट्टनायकमतेन साधारणीकरणं केन व्यापारेण भवति ?

6 रामकृष्णकविना सम्पादिते नाट्यशास्त्रस्य वडोदरा (बरोडा) संस्करणे प्रथमं कति अध्यायाः प्रकाशिता आसन् ?

7 "न शक्यमस्य नाट्यस्य गन्तुमन्तं कथञ्चन" । कस्मात् ?

8 "सर्वथा रसनात्मकवीतविघ्नप्रतीतिग्राह्यो भाव एव रसः ।" इत्यस्मिन् वाक्ये भावशब्देन कतमः भावविशेषः निर्दिष्टः ?

9 रससूत्रव्याख्यायाम् उत्पत्तिवादः कस्य ?

10 नाट्यशास्त्रस्य प्रसिद्धं काशीसंस्करणं केन सम्पादितम् ?

11 सिद्धीनां नाटकाश्रयं लक्षणं नाट्यशास्त्रस्य कस्मिन्नध्याये प्रतिपादितमस्ति ?

12 घाताः कतिविधाः ? के च ते ?

13 पात्रगतं विधिं स्पष्टयत ।

14 तत्र साधु इति वाक्यं नाट्ये कुत्र प्रयोक्तव्यम् ?

(14 × 1 = 14 marks)

Turn over

CHMK LIBRARY UNIVERSITY OF CALICUT

II. **अष्टानां** लघुटिप्पणीर्लिखत :

15 नाट्यशास्त्रस्य भाषान्तरानुवादा: ।

16 अभिनवभारतीव्याख्यानस्य सर्वेक्षणम् ।

17 नाट्यशास्त्रस्य काशीसंस्करणम् ।

18 नाट्यशास्त्रस्य रसाध्याये विद्यमानस्य ''नहि रसादृते कश्चिदर्थ: प्रवर्तते'' इति सूत्रस्य अभिनवभारतीगतं व्याख्यानम् ।

19 अनुकरणरूपो रस: इति कस्माद् वक्तुं न शक्यते इति अभिनवभारतीमनुसृत्य प्रतिपादयत ।

20 शृङ्गाररसस्य भेदा: ।

21 ऊर्ध्वोर्ध्वमारूह्य यदर्थतत्त्वं धी: पश्यति श्रान्तिमवेदयन्ती ।

फलं तदाद्यै: परिकल्पितानां विवेकसोपानपरम्पराणाम् ।।

इति कारिकाया: अर्थं लिखत ।

22 करूणरसस्य विभावानुभावव्यभिचारिण: ।

23 घातस्य स्वरूपम् ।

24 सिद्धिद्वयम्

25 काव्यस्य घातस्यानानि कानि ?

26 नाट्यशास्त्रस्य वडोदरा (बरोडा) संस्करणम् ।

(8 × 3 = 24 marks)

III. यथेच्छं **सप्त** प्रशनानं लघुनिबन्धात्मकम् उत्तरं लिखत :

27 ''अप्रधाने च वस्तुनि कस्य संविद् विश्राम्यति । तस्यैव प्रत्ययस्य प्रधानान्तरं प्रत्यनुधावत: स्वात्मन्यविश्रान्तत्वात्'' इति ग्रन्थभागं स्पष्टयत ।

28 अर्थक्रियापि मिथ्याज्ञानदृष्टा इति ग्रन्थभागं स्पष्टयत ।

29 वीररसस्य भेदान् यथाग्रन्थं निरूपयत ।

30 तेषामुत्पत्तिहेतवश्चत्वारो रसा: इति ग्रन्थभागं स्पष्टयत ।

CHMK LIBRARY UNIVERSITY OF CALICUT

31 हास्यरसस्य प्रभेदान् यथाग्रन्थं स्पष्टयत ।

32 स्वं स्वं निमित्तमासाद्य शान्ताद्भाव: प्रवर्तते इति वाक्यस्यार्थं स्पष्टयत ।

33 एवं साधयितव्यैषा तज्ज्ञै: सिद्धिस्तु मानुषी । कथं मानुषी सिद्धि: साधयितव्या इति यथाग्रन्थं स्पष्टयत ।

34 प्राश्निकानां लक्षणं यथाग्रन्थं निरूपयत ।

35 चतुर्विधानां घातानां स्वरूपं स्पष्टयत ।

(7 × 4 = 28 marks)

IV. यथेच्छं **द्वयो:** निबन्धात्मकमुत्तरं लिखत :

36 अभिनवभारतीमवलम्ब्य अभिनवगुप्ताभिमतं रससूत्रव्याख्यानम् ।

37 अभिनवकृतं शान्तरसनिरूपणं सङ्क्षेपेण स्ववाक्यै: स्पष्टयत ।

38 सिद्धिव्यञ्जकाध्यायस्य सङ्क्षेपेण परिचयो देय: ।

39 नाट्यशास्त्रानुसारेण प्रेक्षकलक्षणं लिखत ।

(2 × 7 = 14 marks)

CHMK LIBRARY UNIVERSITY OF CALICUT

**D 93524** (Pages : 4) Name....................................

Reg. No..................................

# FIRST SEMESTER P.G. DEGREE EXAMINATION, NOVEMBER 2020

(CCSS)

Sanskrit Language and Literature General

SKT 1C 01—SANSKRIT LITERATURE

(2019 Admissions)

Time : Three Hours Maximum : 80 Marks

*Answers should be written* **either** *in English* **or** *in Sanskrit.*
*In writing Sanskrit Devanagari Script should be used.*

I. यथेच्छं **षण्णां** व्याख्यानं कुरूत :

1 कियच्चिरं दैवतभाषितानि
निह्नोतुमेनं प्रभवन्तु नाम ।
पलालजालै: पिहित: स्वयं हि
प्रकाशमासादयतीक्षुडिम्भ: ।।

2 कयाचिदालोक्य नलं ललज्जे
कयापि तद्भासि हृदा ममज्जे ।
तं कापि मेने स्मरमेव कन्या
भेजे मनोभूवशभूयमन्या ।।

3 सूक्ष्मे घने नैषधकेशपाशे
निपत्य निष्पन्दतरीभवद्भ्याम् ।
तस्यानुबन्धं न विमोच्य गन्तु-
मपारि तल्लोचनखञ्जनाभ्याम् ।।

CHMK LIBRARY UNIVERSITY OF CALICUT

Turn over

4 सालीकदृष्टे मदनोन्मदिष्णु-

र्यथाप शालीनतमा न मौनम् ।

तथैव तथ्येऽपि नले न लेभे

मुग्धेषु कः सत्यमृषाविवेकः ।।

5 ततः शरच्चन्द्रकराभिरामै-

रूत्सर्पिभिः प्रांशुमिवांशुजालैः ।

बिभ्राणमानीलरूचं पिशङ्गी-

र्जटास्तडित्वन्तमिवाम्बुवाहम् ।।

6 श्रियं विकर्षत्यपहन्त्यघानि

श्रेयः परिस्तौति तनोति कीर्त्तिम् ।

सन्दर्शनं लोकगुरोरमोघं

तवात्मयोनेरिव किं न धत्ते ।।

7 विधाय विध्वंसमनात्मनीनं

शमैकवृत्तेर्भवतश्छलेन ।

प्रकाशितत्वन्मतिशीलसाराः

कृतोपकारा इव विद्विषस्ते ।।

8 योगश्च तं योग्यतमाय तस्मै

तपः प्रभावाद् विततार सद्यः ।

येनाऽस्य तत्त्वेषु कृतेऽवभासे

समुन्मिमीलेव चिराय चक्षुः ।।

(6 × 4 = 24 marks)

II. सप्रसङ्गं चतुर्णामर्थं लिखत :

9 दृशा पपुस्ताः सुदृशः समस्ताः

सुता च भीमस्य महीमघोनः ।।

CHMK LIBRARY UNIVERSITY OF CALICUT

10 चिरं चकारोभयलाभलोभा—

त्स्वभावलोला गतमागतं च ।।

11 तच्चिन्ति चित्तं परमेश्वरस्तु

भक्तस्य हृष्यत्करूणो रूणद्धि ।।

12 वीतस्पृहाणामपि मुक्तिभाजां

भवन्ति भव्येषु हि पक्षपाता: ।।

13 अत: प्रकर्षाय विधिर्विधेय:

प्रकर्षतन्त्रा हि रणे जयश्री: ।।

14 पार्थाननं वह्निकणावदाता

दीप्ति: स्फुरत्पद्ममिवाभिपेदे ।।

(4 × 2½ = 10 marks)

III. यथेच्छं द्वयो: लघुटिप्पणिरूपेणोत्तरं लिखत :

15 स्वाच्छन्द्यमानन्दपरम्पराणां

भैमी तमालोक्य किमप्यवाप ।

महारयं निर्झरिणीव वारा—

मासाद्य धाराधरकेलिकालम् ।।

इत्यस्मिन् पद्ये उपमासौन्दर्यं प्रदर्शयत ।

16 तत्कालमानन्दमयीभवन्ती

भवत्तरानिर्वचनीयमोहा ।

सा मुक्तसंसारदिशारसाभ्यां

द्विस्वादमुल्लासमभुङ्क्त मिष्टम् ।।

सा दमयन्ती । कथं द्विस्वादम् उल्लासम् अभुङ्क्त ?

17 एते दुरापं समवाप्य वीर्य्यम्

उन्मूलितार: कपिकेतनेन ।। इति पद्यार्धस्य अर्थं लिखत ।

CHMK LIBRARY UNIVERSITY OF CALICUT

18 प्रसेदिवांसं तमुपाससाद

वसन्निवान्ते विनयेन जिष्णुः ।। इति पद्यार्धस्य अर्थं प्रतिपादयत ।

(2 × 3 = 6 marks)

IV. यथेच्छं **द्वयोः** लघुपन्यासरूपेणोत्तरं लिखत :

19 चन्द्रगुप्तस्य स्वभावं स्ववाक्यैः लिखत ।

20 मलयकेतोः स्वभावं स्ववाक्यैः लिखत ।

21 मुद्राराक्षसमिति नाम्नः औचित्यं विशदयत ।

(2 × 4 = 8 marks)

V. यथेच्छं **पञ्चानां** सप्रसङ्गं व्याख्यानं कुरूत :

22 अहो महान् विज्ञानराशिरूपरतः ।

23 अत्यादरः शङ्कनीयः ।

24 न शालेः स्तम्बकारिता वप्तुर्गुणमपेक्षते ।

25 नहि सर्वः सर्वं जानाति ।

26 दैवमविद्वांसः प्रमाणयन्ति ।

27 राज्यं हि नाम राजधर्मानुवृत्तिपरस्य नृपतेर्महदप्रीतिस्थानम् ।

(5 × 4 = 20 marks)

VI. यथेच्छं **द्वयो**: उपन्यासरूपेणोत्तरं लिखत

28 संस्कृतनाटकेषु मुद्राराक्षसं मृच्छकटिकमिव अपवादभूतं भवति । समर्थयत ।

29 मुद्राराक्षसस्य प्रथमाङ्ककथां स्ववाक्यैः संक्षिपत ।

30 मुद्राराक्षसे प्रतिबिम्बितं विशाखदत्तस्य राजनीतिशास्त्रनैपुण्यं निरूपयत ।

31 चन्दनदासामात्यराक्षसयोः मित्रतायाः गहनतां विस्तरेण प्रतिपादयत ।

(2 × 6 = 12 marks)

CHMK LIBRARY UNIVERSITY OF CALICUT

**D 72683** (Pages : 2) Name.................................

Reg. No..............................

**FIRST SEMESTER M.A. DEGREE EXAMINATION, DECEMBER 2019**

(CUCSS)

Sanskrit Language and Literature (General)

SKT 1C 01—POETRY AND DRAMA

(2014 Admissions)

Time : Three Hours Maximum : 36 Weightage

*(संस्कृतभाषया उत्तराणि देयानि। देवनागरी लिपिरुपयोक्तव्या।)*

**Part A (नैषधीयचरितम्)**

I. द्वाभ्यां व्याख्यात :

1. नेत्राणि वेदर्भसुतासखीनां विमुक्ततत्तद्विषयग्रहाणि ।
   प्रापुस्तमेकं निरुपाख्यरूपं ब्रह्मेव चेतांसि यतव्रतानाम् ।।
2. धातुर्नियोगादिह नैषधीयं लालासरस्सेवितुमागतेषु ।
   हैमेषु हंसेष्वहमेक एव भ्रमामि भूलोकविलोकनोत्कः ।।
3. रेखाभिरास्ये गणनादिवास्य द्वात्रिंशता दन्तमयीभिरन्तः ।
   चतुर्दशाष्टादश चात्र विद्या द्वेधाऽपि सन्तीति शंशसवेधाः ।।
4. वार्ता च साऽसत्यपि नान्यथेति योगादरन्ध्रे हृदि तां निरुन्धे ।
   विरञ्चिनाननवादधौत समाधिशास्त्र श्रुतिपूर्णकर्णः ।।

(2 × 3 = 6 weightage)

II. त्रयाणं सप्रकरणमाशयं च विशदयत :

5. सम्भ्रान्तमन्तःकरणश्चकार ।
6. प्रतार्य तेनाचकृषे कृशाङ्गी ।
7. श्लोकद्वयार्थस्सुविधा मया किम्?
8. पुनर्धरित्रीपुरुहूतपुत्री।
9. अद्धापथान्न संसर्गगुणेन बद्धा ।

(3 × 2 = 6 weightage)

III. निबन्ध लिखत :

10. हंसकृतं नलवर्णनं उपन्यस्यत ।

**अथवा**

पञ्चमहाकाव्येषु नैषधस्य प्राधान्यम् ।

(1 × 6 = 6 weightage)

**Turn over**

CHMK LIBRARY UNIVERSITY OF CALICUT

## Part B (मालविकाग्निमित्रम्)

IV. **द्वाभ्यां** व्याख्यात :

11. यद्यत्प्रयोगविषये भाविकमुपदिश्यते मया तस्यै ।
तत्ताद्विशेषकरणात्प्रात्युपदिशतीव मे बाला ।।

12. न च न परिचितो न चाप्यरम्य-
श्चकितमुपैमि तथापि पार्श्वमस्य ।
सलिलनिधिरिव प्रतिक्षणं मे
भवति स एव नवो नवोऽयमक्ष्णोः ।।

13. दाक्षिण्यं नाम बिम्बोष्ठि वैम्बिकानां कुलव्रतम्।
तन्मे दीर्घाक्षि ये प्राणास्ते त्वदाशानिबन्धनाः ।।

14. तौ पृथग्वरदाकूले शिष्टामुत्तरदक्षिणे
नक्तंदिवं विभज्योभौ शीतोष्णकिरणाविव ।।

(2 × 3 = 6 weightage)

V. **त्रयाणां** सप्रकरणं आशयं च विशदयत :

15. चन्दनं खलु मया पादुकापरिभोगेण दूषितम् ।
16. सन्दर्शितेव ललिताभिनयस्य शिक्षा ।
17. सन्दिग्धमेव सिद्धौ कातरमाशङ्कते चेतः ।
18. ध्रुवसिद्धिमपि यथार्थनामानं सिद्धिमन्तं न मन्यते ।
19. बहुशो मदः किलस्त्रीजनस्य विशेषमण्डनमिति ।

(3 × 2 = 6 weightage)

VI. उत्तरं लिखत :

20. मालविकाग्निमित्रे नायकस्य महिमा निरूपयत ।

**अथवा**

'उपमा कालिदासस्य' विमृशत ।

(1 × 6 = 6 weightage)

CHMK LIBRARY UNIVERSITY OF CALICUT